



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 18/08/2014 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 18/08/2014 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 23/11/2014 | **I Proof Reading & Correction** | **Sri Ranganath Gangoor & H K Srinivasa Rao** |

॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, , 8095551774 9901971176, Email : srkarc@gmail.com*

ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.
ಗ್ರಂಥ ಋಣ:ವ್ಯಾಸನಕೆರೆ ಪ್ರಭಂಜನಾಚಾರ್ಯರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲಗ್ರಂಥಗಳು. ಮತ್ತು ವಿದ್ವಾನ್ ಸತ್ಯಧ್ಯಾನಾಚಾರ್ಯ ಕಟ್ಟಿಯವರಿಂದ ಸಂಪಾದಿಸಲ್ಪಟ್ಟ ದ್ವೈತವೇದಾನ್ತಾಧ್ಯಯನಸಂಶೋಧನಪ್ರತಿಷ್ಠಾನಂ ಇವರಿಂದ ಪ್ರಕಾಶಿತವಾದ

TABLEOFCONTENTS

ಪ್ರಪಞ್ಚಮಿಥ್ಯಾತ್ವಾನುಮಾನಖಣ್ಡನ।


॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥ ....... 2

ಕೃತಜ್ಞತೆಗಳು....... 2

॥ प्रपञ्चमिथ्यात्वानुमानखण्डनम् ॥ ....... 6

ग्रन्थारम्भे मङ्गलाचरणाभावप्रयुक्तन्यूनताशङ्कापरिहारः ....... 6

मायावाद्युक्त प्रपञ्चमिथ्यात्वानुमानानुवादः....... 6

मिथ्यात्वानुमाने व्यतिरेकव्याप्तिप्रदर्शनाभावे कारणकथनम् ....... 6

मिथ्यात्वानुमाने यत्तत्पदयोरावृत्त्यभावेऽपि विवक्षितार्थसिद्धिः....... 7

मिथ्यात्वानुमाने सम्प्रतिपन्नपदकृत्यम्....... 7

प्रपञ्चमिथ्यात्वानुमाने पञ्चावयवाननुवादकारणम्....... 7

प्रपञ्चमिथ्यात्वानुमाने असत्वस्य मिथ्यात्वरूपत्वे अप्रसिद्धविशेष्यतादोषः ....... 7

मिथ्यात्वमसत्वमिति पक्षाश्रयणेन दूषणे छलशङ्का तत्परिहारश्च ....... 7

मिथ्यात्वानुमाने असत्वस्य मिथ्यात्वरूपत्वे अपसिद्धान्तः ....... 8

सर्वथा निर्वचनानर्हत्वस्यमिथ्यात्वरूपत्वे अप्रसिद्ध विशेषणता....... 8

सदसद्वैलक्षण्यस्य मिथ्यात्वरूपत्वे सिद्धसाधनत्वदोषः ....... 8

सिद्धान्तिनामनिष्टस्य सदसद्वैलक्षण्यस्य मिथ्यात्वरूपत्वे अप्रसिद्धविशेषणतादोषः ....... 9

सत्यविवेकस्य मिथ्यात्वरूपत्वे सिद्धसाधनता ....... 9

सत्यतानाश्रयत्वस्य मिथ्यात्वरूपत्वे अपसिद्धान्तादिदोषः ....... 9

सत्त्वाभावस्य आश्रयासिद्धिप्रयोजकत्वसमर्थनम् ....... 9

व्यावहारिकसत्वस्याश्रयत्वप्रयोजकत्वशङ्का तन्निरासश्च....... 9

सत्तां विना अपरोक्षप्रतीतिगोचरत्वस्यैव आश्रयत्वप्रयोजकत्वशङ्का तन्निरासश्च ....... 10

असतोऽपि निषेधाश्रयत्वे व्यावहारिकसत्ताङ्गीकारवैयर्थ्यसाधनम्....... 10

तत्वप्रदीपिकाकारोक्तमिथ्यात्वनिरासः....... 10

आश्रयसिद्धेरदोषत्वशङ्का तन्निरासश्च....... 10

प्रतिज्ञानिराकरणसमाप्तिः हेतुनिराकरणारम्भः ....... 11

दृश्यत्वस्य सत्वाभावे असत्वप्रसङ्गेनासिद्धत्वोपपादनम्....... 11

दृश्यत्वस्यानिर्वचनीयत्वे अन्यतरा सिद्धिः....... 11

दृश्यत्वसामान्यस्य हेतुत्वे अन्यतरासिद्धिः ....... 11

दृग्जन्यफलाश्रयत्वस्य दृश्यत्वे असिद्ध्यादिदोषाः ....... 12

व्याप्तिभङ्गभेदवतां असिद्धादीनां दृष्टत्वक्रमनिरूपणम्....... 12

दृश्यत्वहेतोर्विरुद्धत्वसमर्थनम्............ 12
मूले पूर्वापरविरोधशङ्का तत्परिहारश्च ............ 13
दृश्यत्वहेतोः साध्याभावेन व्याप्तिसमर्थनम्............ 13
दृश्यत्वहेतोरनैकान्तिकतासमर्थनम्............ 13
आत्मनः स्वप्रकाशत्वेन दृश्यत्वाभावशङ्का ............ 13
आत्मनो दृश्यत्वसमर्थनम्............ 13
सोपाधिकस्य दृश्यत्वव्यतिरेकावच्छिन्नस्य दृश्यत्वं स्यादेवेति आनन्दबोधोक्तिनिरासः............ 14
प्रकारान्तरेण आत्मनो दृश्यत्वसमर्थनम्............ 14
आत्मनो वृत्तिविषयत्वेऽपि दृश्यत्वाभावशङ्का तत्परिहारश्च............ 14
फलव्याप्यत्वाभावेनात्मनो न दृश्यत्वमिति शङ्का तन्निरासश्च............ 15
मिथ्यात्वानुमाने अनध्यवसितत्वदोषप्रतिज्ञा ............ 15
जगतोऽभावेऽनुमानस्याप्यभावः इति तर्के व्याप्त्युपपादनम्............ 15
जगतोऽभावे इति मूलस्य असिद्ध्यादिपरत्वेन वैयर्थ्यशङ्का तत्परिहारश्च ............ 15
मिथ्यात्वानुमाने अनध्यवसितत्वदोषोपपादनम्............ 16
अनध्यवसितलक्षणस्य मिथ्यात्वानुमानगतत्वसमर्थनम् ............ 16
असिद्धानध्यवसितयोर्लक्षणोदाहरणभेदसमर्थनम् ............ 16
असत्वस्यैवासाधकत्वोपयोगितासमर्थनम्............ 16
अर्थावच्छिन्नं ज्ञानमिति पक्षे अवच्छिन्नस्य हेतुत्वे अवच्छेदकस्यापि हेतुत्वमित्यादिव्याप्तिभङ्गः...... 16
विश्वमिथ्यात्वानुमानस्य प्रबलप्रमाणबाधोपपादनम्............ 17
प्रपञ्चे त्रैकालिकाबाध्यत्वस्य आगमसिद्धत्वोपपादनम्............ 17
प्रपञ्चे त्रैकालिकाबाध्यत्वस्य प्रत्यक्षाधिसिद्धत्वोपपादनम्............ 17
विश्वमिथ्यात्वानुमाने प्रकरणसमदोषः............ 17
शुक्तिरजते दृग्विषयत्वरूपदृश्यत्वाभावसमर्थनम्............ 18
दृग्व्यावर्तकत्वरूपदृगुल्लेख्यत्वमेव शुक्तिरजतस्येति समर्थनम्............ 18
शुक्तिरजते दृग्विषयत्वरूपदृश्यत्वाभावे विरोधाद्युद्भावनानुपपत्तिशङ्का तन्निरासश्च............ 18
विश्वमिथ्यात्वानुमाने सप्रतिसाधनदोषः............ 18
अनुमानप्रयोगे व्याप्त्यभिधाननियमाभावसूचनम्............ 18
प्रमाणदृष्टत्वहेतुं विकल्प्य दूषणं तन्निरासश्च............ 19
प्रमाणदृष्टत्वानुमाने असिद्धिशङ्का तन्निरासश्च ............ 19
प्रमाणदृष्टत्वानुमाने शङ्कितस्यात्मत्वोपधेर्विकल्पेन निरासः ............ 19
प्रपञ्चस्य सत्यत्वे दृग्दृश्ययोः सम्बन्धाभावेन दृश्यत्वानुपपत्तिशङ्का निरासः ............ 19
अध्यासिकसम्बन्धं विनापि दृग्दृश्ययोः संयोगसम्बन्धमङ्गीकृत्य दृश्यत्वोपपादनम्............ 19
आध्यासिकसम्बन्धं विनापि दृग्दृश्ययोः समवायसम्बन्धमाश्रित्य दृश्यत्वोपपादनम्............ 19

दृग्दृश्ययोः संयोगसमवायातिरिक्तवास्तवसम्बन्धमाश्रित्य दृश्यत्वोपपादनम् ........ 19
प्रपञ्चस्य मिथ्यात्वेऽपि दृश्यत्वानुपपत्तिसमर्थनम् ........ 19
प्रपञ्चमिथ्यात्वानुमाने दृष्टान्ते साध्यवैकल्योपपादनम् ........ 20
शुक्तिरजतानिर्वचनीयत्वसाधकार्थापत्तिशङ्का ........ 20
अर्थापत्तेः सदसदतात्मकत्वेनाप्युपपत्तिसमर्थनम् ........ 20
आध्यासिकसम्बन्धं विना दृश्यत्वानुपपत्तेरेवाभावसमर्थनम् ........ 20
प्रपञ्चमिथ्यात्वानुमाने दृष्टान्ते साधनवैकल्योपपादनम् ........ 20
प्रपञ्चमिथ्यात्वानुमाने उपाधिदोषोद्भावनम् ........ 21
उपाधेः साध्याभिन्नताशङ्का ........ 21
प्रमाणविरुद्धत्वोपाधेः साधनव्यापकत्वशङ्का तत्परिहारश्च ........ 21
प्रमाणविरुद्धत्वोपाधेः साधनव्यापकत्वशङ्का तन्निरासश्च ........ 21
प्रमाणविरुद्धत्वस्यैव मिथ्यात्वे प्रयोजकत्व समर्थनम् ........ 21
पक्षादिलक्षणकथने कारणोक्तिपूर्वं पक्षलक्षणकथनम् ........ 21
सपक्षलक्षणम् ........ 22
विपक्षलक्षणम् ........ 22
प्रतिज्ञालक्षणम् ........ 22
हेतुलक्षणम् ........ 22
दृष्टान्तलक्षणम् ........ 22
ग्रन्थन्ते मङ्गलाचरणम् ........ 22

# ॥ प्रपञ्चमिथ्यात्वानुमानखण्डनम् ॥

नत्वा विश्वोदयस्तेमलयहेतुं पतिं श्रियः। कुर्मः प्रपञ्चमिथ्यात्वनुमानखण्डनपञ्चिकाम्॥

'जन्माद्यस्य यतः' इति भगवता सूत्रकारेण जगदुदयादिनिमित्तकारणत्वं परस्य ब्रह्मणो लक्षणमभिहितम्। न च जगत्सत्यतामन्तरेण तद्वास्तवं सम्भवति। सापि न परोदीरित प्रपञ्चमिथ्यात्वप्रमाणस्य आभासताव्युत्पादनेन विनोपपद्यत इति तदर्थमिदं प्रकरणमारभते भगवानाचार्यः।

ननु कथं स्वपक्षसाधनेन विना निर्णयः? सत्यं, तथापि शास्त्रैक देशसम्बन्धित्वात्प्रकरणस्य न दोषः। विज्ञास्यते च कालातीतता व्युत्पादनेन स्वपक्षसाधनप्रकारोऽपीति।

## ग्रन्थारम्भे मङ्गलाचरणाभावप्रयुक्तन्यूनताशङ्कापरिहारः

ननु अविगीतशिष्टाचारपरम्परादिप्राप्तं प्रारिप्सितपरिसमाप्त्यादि प्रयोजनं किमपि मङ्गलाचरणं प्रकरणादौ कस्मादाचार्यो नानुष्ठितवानिति चेत् कथमेतदवगतम्? अनुपलम्भादिति चेन्न। तत्कालीनस्याधुनोपलब्धुमशक्यत्वात्। ग्रन्थे निवेशनाभावस्तावत्प्रत्यक्षसिद्ध इति चेत्। किमतः? न हि ग्रन्थे निवेशनमेव तदनुष्ठानम्। नापि तद्व्याप्तम्। कायवाक्चित्तनिमित्तानामनेकेषां भावात्। ग्रन्थान्तरे निवेशनादिनैव शिष्या अवगमिष्यन्ति। अत एव न तदनुष्ठानसन्देहोऽपीति।

## मायावाद्युक्त प्रपञ्चमिथ्यात्वानुमानानुवादः

तत्र तावन्मायावादिनोदितं प्रपञ्चमिथ्यात्वानुमानमनुवदति—

'विमतं मिथ्या दृश्यत्वाद्यदित्थं तत् तथा यथासम्प्रतिपन्नम् ।'

'सर्वं मिथ्या' इत्युक्ते ब्रह्मणि प्रमाणबाधः शुक्तिरजतादौ सिद्धार्थता च स्यादिति विमतमित्युक्तम्। विमतेरनेकविधत्वेऽपि साध्यविशेषोपादानात्तद्विशेषसिद्धिः। तथा च सत्यत्वमिथ्यात्वाभ्यां वादिप्रतिवादिविमतविषयो वियदादीत्युक्तं भवति। तर्हि वियदादीत्येव वक्तव्यम्। न चैवं शङ्क्यम् अवच्छेदकानुक्तावुक्तदोषानिस्तारात्।

## मिथ्यात्वानुमाने व्यतिरेकव्याप्तिप्रदर्शनाभावे कारणकथनम्

यद्यपि दृश्यत्वहेतुरन्वयव्यतिरेकी। तथाप्यकुटिलेऽन्वये सम्भवति न कुटिलो व्यतिरेक आदरणीय इति सूचयितुं यदित्थं तत्तथेत्यन्वय एव दर्शितः।

## मिथ्यात्वानुमाने यत्तत्पदयोरावृत्त्यभावेऽपि विवक्षितार्थसिद्धिः

यत्तदिति साधारणप्रयोगादेव सर्वोपसंहारसिद्धेर्द्विर्वचनाभावो न दोषाय। 'गौर्न पदा स्प्रष्टव्या' इतिवत्।

## मिथ्यात्वानुमाने सम्प्रतिपन्नपदकृत्यम्

'सम्प्रतिपन्नम्' दृश्यत्वमिथ्यात्ववत्तयेति शेषः। सम्प्रतिपन्नग्रहणेन साध्यविकलत्वादिदृष्टान्तदोषनिरासोऽपि कृतः स्यादिति शुक्ति रजतमित्येव नोक्तम्।

## प्रपञ्चमिथ्यात्वानुमाने पञ्चावयवाननुवादकारणम्

यद्यपि परेण स्वग्रन्थे पञ्चावयवप्रयोगोऽस्य विहित इति तथैवानु वादो युक्तः। तथाप्युपनयनिगमनयोरसाधनाङ्गत्वादनुवादार्हतापि नास्तीति सूचयितुं त्र्यवयवानुवादः। तच्चान्यत्रोपपादितम्। एवं चानुवदतैव अधिकं नाम निग्रहस्थानमपि सूचितम् भवति।

## प्रपञ्चमिथ्यात्वानुमाने असत्वस्य मिथ्यात्वरूपत्वे अप्रसिद्धविशेष्यतादोषः

एवमनूदितमनुमानं दूषयिष्यन् प्रथमप्राप्तत्वात्प्रतिज्ञाश्रयं दोषमाह।

**-इत्युक्ते जगतोऽभावादाश्रयासिद्धः पक्षः**

इति मायावादिनोक्ते वक्तव्यमिति शेषः। अग्न्याहितादिवदसिद्ध आश्रयो यस्यासावाश्रयासिद्धः। पक्ष इति तदेकदेशस्साध्यधर्मो लक्ष्यते। अथवा सप्तम्यर्थे बहुव्रीहिरिति मुख्यार्थ एव पक्षशब्दः।

'उक्ते' इत्यनेनोक्तिनिमित्तमिदं दूषणमिति सूचयता 'अनुक्तोपा लम्भोऽयं परेण प्रपञ्चासत्वस्यासाधनात्' इति निरस्तं भवति।

ननु 'जगतोऽभावात्' इति हेतुः सिद्धश्चेत्सिद्धं परस्याभिमतम्। किमप्रसिद्धविशेष्यता करिष्यति? असिद्धश्चेत्तथापि। असिद्धाश्रयत्वसाधकाभावात्। मैवम्, यदि जगदभावोऽत्र साध्यते तदा जगतोऽभावात्साध्यधर्मस्य आश्रयसिद्धिः स्यात्। ततश्च विशेष्याभावाद्विशिष्टाबावः इति प्रतिज्ञार्थो बाधितः स्यात् इत्येवं पराङ्गीकृतेन परस्य दोषोद्भावनात्।

## मिथ्यात्वमसत्वमिति पक्षाश्रयणेन दूषणे छलशङ्का तत्परिहारश्च

मिथ्याशब्देन किमसदुच्यते? उतान्यत्किमपि? इति विकल्पेनोपक्रमान्न छलप्रसङ्गः। शिष्याणां कथाक्रमशिक्षणार्थं विकल्पः।

### मिथ्यात्वानुमाने असत्वस्य मिथ्यात्वरूपत्वे अपसिद्धान्तः

अथवा जगतोऽसत्वे प्रतिभाते अपसिद्धान्तमनेनाचष्टे। तथा हि, पक्षः प्रतिज्ञार्थः प्रपञ्चस्यासत्वलक्षणः। स 'आश्रयासिद्धः' आश्रयः सिद्धान्तः तदाश्रयेण कथाप्रवृत्तेः। तस्मिन्नसिद्धः तद्विरुद्ध इति यावत्। कुतः? जगतो भावात् भावत्वेन असद्विलक्षणत्वेन परेणाङ्गीकृतत्वादिति।

### सर्वथा निर्वचनानर्हत्वस्यमिथ्यात्वरूपत्वे अप्रसिद्ध विशेषणता

स्यादेतत्, न वयं मिथ्येत्यत्यन्तासन्तं गगनकुसुमसमं प्रपञ्चमाचक्ष्महे; येन साध्यधर्मस्याश्रयासिद्धिरपसिद्धान्तो वा स्यात्। किन्तु? अनिर्वचनीयमेवेति। अत आह —

**अनिर्वचनीयासिद्धेरप्रसिद्धविशेषणः ।**

पक्ष इत्यनुवर्तते। अत्र पक्ष इति तदेकदेशो धर्मि प्रपञ्चो लक्ष्यते। अप्रसिद्धं विशेषणं यस्मिन्निति मुख्यार्थो वा। अनिर्वचनीयं खलु निर्वचनानर्हमुच्यते। न च तत् प्रागेतदनुमानात्सिद्धम्। सर्वस्यापि निर्वचनार्हत्वात्। अयथा स्वव्याघातो मूकता वा स्यात्। अतो मिथ्यापदेन विमतस्यानिर्वचनीयताभिधाने पक्षोऽप्रसिद्धविशेषणो भवति। अयमपि वचननिमित्तो दोष इति ज्ञातव्यम्।

### सदसद्वैलक्षण्यस्य मिथ्यात्वरूपत्वे सिद्धसाधनत्वदोषः

ननु सदस्द्वैलक्षण्यमेव मिथ्यात्वं ब्रूमो, नासत्वम्। एतदेवानिर्वचनीयत्वं नाम। न तु सर्वथा निर्वचनानर्हत्वमेव। अतो नोक्तदोष इति। तत्राह—

सदसद्वैलक्षण्ये मिथ्यात्वे सिद्धसाधनता ।

प्रतिज्ञादूषणप्रस्तावात्साधनशब्दोऽत्र भावसाधनः। करणसाधनत्वे हि हेतुदूषणं स्यात्। सदसद्वैलक्षण्ये मिथ्यात्वेऽङ्गीक्रियमाणे हि विमतं सद्विलक्षणमसद्विलक्षणं चेति प्रतिज्ञार्थः स्यात्। तत्र असद्विलक्षणत्वं प्रपञ्चस्यास्माभिरङ्गीकृतमेवेति सिद्धसाधनता भविष्यति।

ननु सद्वैलक्षण्येन सहासद्वैलक्षण्यमत्र साध्यते। तत्कथमेष दोषः? इति। मैवं, न हि सद्धमसिद्धेन सहोच्यमानमसिद्धं भवति। सद्वैलक्षण्यविशिष्टासद्वैलक्षण्यसाधनाददोष इति चेत् तथापि सिद्धसाधन तैव। सतोऽपि सदन्तरवैलक्षण्याङ्गीकारात्। सदसद्वैलक्षण्यं नाम सदसत्त्वानाश्रयत्वमिति चेत् तथापि न सिद्धसाधनतानिस्तारः। सत्वैकस्वभावस्य प्रपञ्चस्य सदसत्त्वानङ्गीकारात्। प्रत्येकमुभयानाश्रयत्वमिति चेत्। तथाप्यसत्त्वानाश्रयत्वेन सिद्धसाधनता तादवस्थ्यम्।

विशिष्टसाधनाददोष इति चेत् तथापि देशकालपरिच्छिन्नेषु घटादिषु व्यवस्थाश्रयणेन सिद्धसाधनतैवेति।

## सिद्धान्तिनामनिष्टस्य सदसद्वैलक्षण्यस्य मिथ्यात्वरूपत्वे अप्रसिद्धविशेषणतादोषः

अथैवं ब्रूयात् यादृशं सदसद्वैलक्षण्यं सद्वादिनामनिष्टं तन्मिथ्यात्वमिति। तत्राप्येतदेवोत्तरम्। तथा हि, सदसद्वैलक्षण्य मिथ्यात्वेऽङ्गीक्रियमाणे सति असिद्धसाधनता अप्रसिद्धविशेषणता भवतीति। एतच्च दृष्टान्तव्युदासप्रस्तावे वक्ष्यामः। सर्वत्र असद्वैलक्षण्यसाधनवैयर्थ्यं च।

## सत्यविवेकस्य मिथ्यात्वरूपत्वे सिद्धसाधनता

सत्यविवेकस्य मिथ्याभावस्य साध्यत्वान्नोक्तदोष इति चेत् न। सत्यान्तरविवेकाङ्गीकारेण सिद्धसाधनत्वात्।

## सत्यतानाश्रयत्वस्य मिथ्यात्वरूपत्वे अपसिद्धान्तादिदोषः

सत्यतानाश्रयत्वं सत्यविवेक इति चेत्। केयं सत्यता? अर्थक्रियासामर्थ्यादिलक्षणा चेत्तदनाश्रयत्वसाधने परस्यापसिद्धान्तप्रसक्तिः। तदन्या चेत्सिद्धसाधनतैव।

सत्यमबाध्यं बाध्यं मिथ्येति तद्विवेक इति चेत्। तर्हि बाधो वक्तव्यः। अन्यथाविज्ञातस्य सम्यग्विज्ञानं चेत्सिद्धसादनतैव। क्षणिकत्वादिना विज्ञातस्य प्रपञ्चस्य अक्षणिकत्वादिबाधकज्ञानविषयत्वस्यास्माभिरङ्गीकृतत्वात्।

प्रतिपन्नोपाधौ त्रैकालिकसत्यतानिषेध इति चेत् न। सत्यताया एवाद्याप्यनिरूपणात्।

## सत्त्वाभावस्य आश्रयासिद्धिप्रयोजकत्वसमर्थनम्

किं चैवं सति अत्यन्तासत्वमेव प्राप्तमिति आश्रयासिद्ध्यादि प्रत्यावृत्तिः। सत्त्वनिषेध एव क्रियते। न त्वसत्त्वविधिरिति चेन्न। सत्त्वनिषेधातिरिक्तस्यासत्वस्याभावात्। भावेऽपि सत्त्वनिषेधेनैवाश्रयासिद्धिः स्यात्। असत्त्वमानाश्रयत्वे प्रयोजकं न सत्त्वाभाव इति चेन्न। नियामकाभावात्। समं प्रतिवादिनोऽपीति चेत् अस्तु तावत्, आश्रयासिद्धिसन्देहेऽप्यनुमानमसाधकम्।

## व्यावहारिकसत्वस्याश्रयत्वप्रयोजकत्वशङ्का तन्निरासश्च

व्यावहारिकसत्तास्वीकारादाश्रयतोपपत्तिरिति चेत् केयं व्यावहारिकी सत्ता? यदा व्यवहारनिर्वाहहेतुस्तदा सिद्धं नः समीहितम्। व्यर्थं च व्यावहारिकीति विशेषणम्। सत्तामङ्गीकृत्य पुनस्तन्निषेधे परस्यापसिद्धान्तश्च।

परमार्थिकत्वमेव निषिध्यते न तु व्यावहारिकी सत्तेति चेत् किमिदं परमार्थिकत्वम् ? अव्यावहारिकत्वं चेत् निषिध्यताम्। न नो हानिः। अबाध्यत्वमिति चेत् अबाध्यत्वनिषेधो बाध्यत्वमेव। तच्च सत्तानिषेध इति कुतो व्यावहारिकी सत्तापि? इतरेतराश्रयदोषो वा स्यात्।

भ्रान्तिसिद्धा सत्ता व्यावहारिकी सत्तेति चेत् तथा सति नास्ति सत्तेत्यनाश्रयतैव।

ननु प्रतीतिगोचरतामात्रेण आश्रयतोपपत्तौ किं सत्तया? सुरभितासाधने तु गगनारविन्दस्य नाश्रयता सत्ताविरहात्। अपि तु निरुपाख्यत्वादिति चेन्न। तथा सति शब्दाद्गगनारविन्दादिसत्ताप्रतीतौ तत्र सुरभितासाधने नाश्रयासिद्धिरुद्भाव्येत। अस्त्वेवम्, अङ्गान्तरवैकल्यं तत्र भविष्यतीति चेन्न। काल्पनिकाङ्गसाकल्यस्य सर्वत्र सौलभ्यात्। तथा च न साधनतदाभासनियमः स्यात्। वाद्याद्यभ्युपगमेन नियम इति चेन्न। कथाभासप्रसङ्गेन असत्साधनदूषणयोरपि सत्वप्रसङ्गात्। किं चैवं सति प्रकृतानुमानस्यापि न तत्वावेदकत्वं स्यात्।

## सत्तां विना अपरोक्षप्रतीतिगोचरत्वस्यैव आश्रयत्वप्रयोजकत्वशङ्का तन्निरासश्च

गगनारविन्दस्यापरोक्षप्रतीतिर्नास्तीति चेत् तथा सत्यतीन्द्रिय प्रपञ्चभागस्य अनाश्रयत्वं स्यादिति।

## असतोऽपि निषेधाश्रयत्वे व्यावहारिकसत्ताङ्गीकारवैयर्थ्यसाधनम्

यदप्युक्तं "निषेधं प्रति असतोऽप्याश्रयत्वं सम्भवति। यथा 'वन्ध्यासुतो न वक्ता' इति। अन्यथा स्ववचनव्याघातादिदोष प्रसङ्गः। किमु व्यवहारसतः प्रपञ्चस्य" इति। तदनुपपन्नम्। निषेधं प्रत्याश्रयत्वे विधिं प्रति तत्कस्मान्न स्यात्। न हि विधिनिषेधयोर्वस्तुत्वे कश्चिद्विशेषः।

## तत्वप्रदीपिकाकारोक्तमिथ्यात्वनिरासः

एतेन स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वं मिथ्यात्वमिति निरस्तम्। तदेतदपाकृतासत्त्वानिर्वचनीयत्त्वाभ्यां न बहिर्भूतमिति न पृथगाशङ्क्य दूषितम्।

## आश्रयसिद्धेरदोषत्वशङ्का तन्निरासश्च

नन्वाश्रयासिद्धिरस्माकं न दोषः। परोऽपि तथा अङ्गीकुरुते। 'निरुपाख्यमप्याश्रय एव' इत्युक्तत्वात्। तत्कथं तदुद्भावनम्? इत्थम्। यद्यपि परो वैयात्यमात्रेण तथागतमतमनुसृत्य तथाह। तथापि नासौ तत्सिद्धान्तः तथात्वे निरुपाख्यस्यापि प्रतीत्यङ्गीकार प्रसङ्गात्। प्रपञ्चस्य व्यावहारिकसत्तास्वीकारवैयर्थ्यापत्तेश्चेति।

## प्रतिज्ञानिराकरणसमाप्तिः हेतुनिराकरणारम्भः

प्रतिज्ञानिराकरणानन्तरं हेतुनिरासावसरः। तत्रादौ लिङ्गदर्शनं, ततो व्याप्तिस्मृतिः, अथावसरविचारसत्ततोऽनुमितिरिति तेनैव क्रमेण हेतुमाभासिकरिष्यन्नसिद्धिं तावदाह—

**दृश्यत्वाभावादसिद्धो हेतुः ।**

हेतुरिति तदर्थो लिङ्गमुच्यते। परेण हेतुतया अभिधीयमानत्वमेवास्य हेतुत्वं न तु वास्तवमिति न व्याघातः।

## दृश्यत्वस्य सत्वाभावे असत्वप्रसङ्गेनासिद्धत्वोपपादनम्

दृश्यत्वं हि परेण वियदादिप्रपञ्चस्य न तावत्सत्यमङ्गीकर्तुं शक्यम्। तत्र दृश्यत्वस्य वृत्तावनैकान्तिकत्वप्रसङ्गात्। अवृत्तावज्ञानासिद्धिप्रसक्तेः। अतस्तदसदेवेति वाच्यम्। तथा च दृश्यत्वाभावादसिद्धो हेतुः स्यात्।

## दृश्यत्वस्यानिर्वचनीयत्वे अन्यतरा सिद्धिः

मा भूत् सत्यं दृश्यत्वम्। अनिर्वचनीयं तु विद्यत एव। अतो नासिद्धिरित्यत आह —

**अनिर्वचनीयासिद्धेरेव ।**

अनिर्वचनीयदृश्यत्वस्य प्रपञ्चे अस्माकमसिद्धेरसिद्धिरेव।

## दृश्यत्वसामान्यस्य हेतुत्वे अन्यतरासिद्धिः

न ब्रूमो वयं सत्यमनिर्वचनीयं वा दृश्यत्वं हेतुरिति। येनान्यतरा सिद्धिः स्यात्। किं नाम? दृश्यत्वसामान्यम्। तच्चास्त्येव वियदादौ वादिप्रतिवादिसम्मतमिति कथमसिद्धिः स्यात्। साधारणप्रयुक्तहेतोश्च विशेषविकल्पेन निरासे सर्वानुमानभङ्गः। तथा च धूमाद्धूम-ध्वजसाधनेऽप्यनेतद्देशकालसंलग्नो धूमो हेतुः? किं वैतद्देशकालसंलग्नः? इति विकल्प्य असिद्धिराद्ये, द्वितीये साधनशून्यं निदर्शनमिति शक्यते वक्तुम्। तत्र च अविवक्षितविशेषं धूममात्रं हेतुरित्येव परिहारः। स तु समः प्रकृतेऽपीति। तत्राप्येतदेवोत्तरम्। तथा हि। स्यादयं धूमानुमाने हरिहारः। धूमद्वयेऽपि धूमवत्वसामान्यस्य वादिप्रतिवादिसम्मतत्वात्। न च सत्यानिर्वचनीयदृश्यत्वयोर्दृश्यत्व सामान्यं वादिप्रतिवादिसम्मतम्। येनात्र तथा परिहारः स्यात्। अनिर्वचनीयस्य स्वरूपत एवास्माकमसिद्धेः। न चासिद्धाश्रयं सामान्यं सिद्धं भवति।

## दृग्जन्यफलाश्रयत्वस्य दृश्यत्वे असिद्ध्यादिदोषाः

अथवा दृग्जन्यफलाश्रयत्वं दृश्यत्वं परेण वक्तव्यम्। वृत्तिव्याप्यत्वस्य साधारणस्य च दृश्यत्वस्य आत्मनि विपक्षेऽप्यङ्गीकृतत्वेन अनैकान्तिकत्वापातात्। ज्ञाततालक्षणफलस्यान्यत्र निराकृतत्वेन अस्मन्मते दृश्यत्वाभावादसिद्धो हेतुः स्यात्।

ज्ञातताङ्गीकारेऽपि अतीतादावतीन्द्रियेषु च दृश्यत्वाभावाद्भागासिद्धिः। असिद्धो हेतुरिति च योगविभागः कर्तव्यः। तेन आश्रयासिद्धिसङ्ग्रहोऽपि भवति। उपपत्तिस्तु पूर्वोक्तैवानुसन्धेयेति।

ननु दृश्यत्वाभावातिरिक्तं न तस्यासिद्धत्वं नाम। अतः कथं हेतुहेतुमद्भावः? मैवं, सामान्यविशेषभावेन वृक्ष्यत्वशिंशुपात्वयोरिवोपपत्तेः। व्यवहारो वा अत्र साध्य इत्यदोषः। एवमुत्तरत्रापि वेदितव्यम्।

## व्याप्तिभङ्गभेदवतां असिद्धादीनां दुष्टत्वक्रमनिरूपणम्

व्याप्तिभङ्गभेदाः विरुद्धानैकान्तिकानध्यवसिताः। तत्र विरुद्धो विपरीतनिश्चयं करोति। अनैकान्तिकः सन्देहमुत्पादयति। अनध्यवसितस्तु ज्ञानमेव न जनयति। तदेवं दुष्टत्वक्रमानुरोधेन व्याप्त्यभावमुद्भावयिष्यन् विरुद्धं तावदाह —

## दृश्यत्वहेतोर्विरुद्धत्वसमर्थनम्

**अनिर्वचनीयासिद्धेरेव सपक्षाभावाद्विरुद्धः ।**

हेतुरिति सर्वत्रानुवर्तते। ननु साध्यविपरीतव्याप्तो हेतुर्विरुद्ध उच्यते। न तु सपक्षशून्यः। तथा सति केवलव्यतिरेकिणो हेतोरनध्यवसितविशेषस्यापि विरुद्धत्वप्राप्तेः। तत्कथमुक्तं 'सपक्षाभावाद्विरुद्धः' इति। कथं च अनिर्वचनीयासिद्धेः सपक्षाभावः? न ह्यनिर्वचनीयता मिथ्यात्वं इति परेणोक्तमिति। मैवम्, एवं हीदं विज्ञायते। यावन्तो हि मिथ्यात्वविकल्पास्ते सर्वे नासत्त्वानिर्वचनीयत्वाभ्यां बहिर्भूता इत्युपपादितम्। तत्रासत्यत्वमपसिद्धान्तादिभयान्न परेणाङ्गीकृतमिति वाचनिकविन्यासभेदेनाप्यनिर्वचनीयत्वमेव परस्याभिप्रायव्याप्तम्। ततोऽनिर्वचनीयनैव सपक्षेण भाव्यम्। तथा च यथा अनिर्वचनीयासिद्धेरप्रसिद्धविशेषणत्वाद्युक्तम् एवं तत एव सपक्षाभावाद्वियदादिव्यतिरिक्तं सर्वं विपक्ष इति शुक्तिरजतादौ विपक्षे वर्तमानत्वात्साध्यविपरीतव्याप्त्या विरुद्धो हेतुरिति।

## मूले पूर्वापरविरोधशङ्का तत्परिहारश्च

ननु 'रजतं दृष्टमिति भ्रममात्रत्वात्' इति शुक्तिरजतादेर्दृश्यत्वाभावं वक्ष्यति। अतः कथं न विरोधः? सत्यं, यथा न विरोधस्तथा तत्रैव वक्ष्यामः।

## दृश्यत्वहेतोः साध्याभावेन व्याप्तिसमर्थनम्

अथवा 'आत्मनोऽपि दृश्यत्वात्' इति वक्ष्यमाणमत्रापि सिंहावलोकनन्यायेन सम्बध्यते। तत्र 'सपक्षाभावात्' इत्यनेन साध्यसम्बन्धाभाव उपपादितः। 'आत्मनोऽपि दृश्यत्वात्' इत्यनेन तदभावसम्बन्दः समर्थितः। तथा च विपरीतव्याप्तिरेव सिद्धा भवतीति।

## दृश्यत्वहेतोरनैकान्तिकतासमर्थनम्

आत्मनोऽपि दृश्यत्वादनैकान्तिकः ।

न केवलं सपक्षस्य शुक्तिरजतादेः, किं तु? विपक्षस्यात्मनोऽपीति योजना। नन्वेतद्विरुद्धम्। प्रागनिर्वचनीयाभावात्सपक्षाभाव उक्तः। इदीनीं तु तद्भावः। न हि तदभावे तत्र दृश्यत्वस्य वृत्तिः सम्भवतीति। सत्यम्, अभ्युपगमवादोऽयमित्यदोषः। वाद्यनैकान्तिको वा। आत्मनि दृश्यत्वस्य तं प्रति समर्थनात्।

अथवा मिथ्यात्वं नाम असत्वं वा अनिर्वचनीयत्ववं वा सद्विविक्तत्वं वा वक्तव्यम्। तत्र अनिर्वचनीयत्वे साध्ये विरुद्धत्वमुक्त्वा असत्वसद्विविक्तत्वयोरनैकान्तिकत्वमनेनोच्यते। एतेन लक्षणविरोधोऽपि परिहृतः।

## आत्मनः स्वप्रकाशत्वेन दृश्यत्वाभावशङ्का

आह, नात्मनो दृश्यत्वं युक्तम्। तस्यापराधीनप्रकाशत्वात्। तथाहि, ममेदमनुकूलं प्रतिकूलमिति वा विज्ञानस्य अवच्छिन्नप्रकाशत्वेन अवच्छेदकात्मप्रकाशनान्तरीयकत्वात् अवश्यमात्मा प्रकाशत इत्यङ्गीकार्यम्। तस्य च मानसवेदनीयतायां वृत्तिविरोधात्, संवित्कर्मतामन्तरेणापरोक्षस्य संविदधीनप्रकाशताविरोधात् परिशेषतः स्वप्रकाशतासिद्धिरिति।

## आत्मनो दृश्यत्वसमर्थनम्

तत्रेदं वक्तव्यं, किमात्मनो निरुपाधिकरूपमपराधीनप्रकाशम्? उत सोपाधिकमपि? आद्ये किमनेनानुकूलप्रतिकूलसम्बन्धिनः सोपाधिकस्यापराधीनप्रकाशताप्रतिपादनेन। द्वितीये तु ज्ञानमात्रस्यात्मन्यवृत्तिप्रसङ्गात्।

'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते 'इत्यादिस्ववचनविरोधश्च स्यात्। किं च 'आत्मा न पराधीनप्रकाशः' इति वृत्तिविषयो न वा? आद्ये दृश्यत्वापत्तिः। मूकोऽहमितिवत्स्वक्रियाविरोधश्च। द्वितीये व्यतिरेकासिद्ध्या सन्दिग्धानैकान्तिकः।

## सोपाधिकस्य दृश्यत्वव्यतिरेकावच्छिन्नस्य दृश्यत्वं स्यादेवेति आनन्दबोधोक्तिनिरासः

नान्वात्मनो निरुपाधिकं रूपमेवापराधीनप्रकाशम्। सोपाधिकं तु पराधीनप्रकाशमपि। तेन स्वप्रकाशत्वेऽपि व्यतिरेकावच्छिन्नस्य स्यादेव दृश्यतेति चेत् न। व्यतिरेकावच्छिन्नस्य सत्यत्वे अनैकान्त्यतादवस्थ्यात्। मिथ्यात्वे किमनेन सिद्धेनापि व्यतिरेकेण। प्रत्युत तस्य पक्षतया भागासिद्धिश्च स्यात्।

दृश्यत्वव्यतिरेकावच्छिन्नं दृश्यमिति विप्रतिशिद्धं च । अत एव 'यतो वाचः' इत्यादिश्रुतयोऽप्यन्यथा योजनीयाः। निरुपाधिकरूपे पुनस्तदवस्थो व्यतिरेकानिश्चयः।

## प्रकारान्तरेण आत्मनो दृश्यत्वसमर्थनम्

एवमात्मैकत्वज्ञानमपि सोपाधिकविषयं चेत् न मोक्षसाधनं स्यात्। निरुपाधिकविषयत्वे दृश्यत्वापत्तिः।

व्यतिरेकावच्छिन्नस्य स्यादेव दृश्यतेति परवाक्येनैवाऽत्मनो दृश्यत्वसमर्थनम्।

किं च यथा दण्डिनो दर्शने देवदत्तोऽपि दृष्ट एव एव मवच्छिन्नात्मनो दृश्यत्वेऽप्यात्मा दृष्ट एवेति किमनेन? तथापि शुद्धेन रूपेण न दृश्यत इति चेत्, मा दर्शि। सत्येऽप्यात्मनि गतं दृश्यत्वम्। अनैकान्तिकं स्थितमेव। सोऽपि मिथ्येति चेत् तर्हि किमत्र व्यतिरेकग्रहणेन? इत्युक्तम्। अपि चैवं घटोऽप्यपराधीनप्रकाश इति भागासिद्धत्वं स्यात्।

## आत्मनो वृत्तिविषयत्वेऽपि दृश्यत्वाभावशङ्का तत्परिहारश्च

अपर आह, आत्मनो वृत्तिविषयत्वेऽपि न दृश्यत्वमनैकान्तिकम्।न हि दर्शनप्रतियोगितामात्रं दृश्यत्वं हेतुः। अपि तु स्वव्यवहारे स्वातिरेकिदर्शनापेक्षानियतिः। न चात्मनि स्वप्रकाशे सोऽस्तीति। तदप्यसत्। स्वप्रकाशत्वाद्वितीयत्वादि रूपेण आत्मव्यवहारस्य स्वातिरेकिसंवित्सापेक्षतानियमात्। औपाधिकात्मविकल्पे तदुपनायकप्रमाणापेक्षानियमोऽपि न स्वरूपमात्रव्यवहृतौ तदपेक्षेति चेत्तर्हि सममेतद्घटादाविति भागासिद्धः स्यादित्युक्तम्। अथ घटे विशिष्टव्यवहारातिरिक्तो व्यवहार एव

नास्तीति चेत् तुल्यमात्मनि। सुषुप्त्यादावस्तीति चेत्, कुतः सिद्धः? 'एतावन्तं कालं सुखमहं सुप्तोऽस्मि' इत्युत्तरकालपरामर्शादिति चेति तर्हि तत एव विशिष्टव्यवहारसिद्धिरिति तूष्णीमास्व।

## फलव्याप्यत्वाभावेनात्मनो न दृश्यत्वमिति शङ्का तन्निरासश्च

अन्यस्त्वाह, वृत्तिविषयस्याप्यात्मनोऽनाधेयातिशयत्वात्प्रकाश रूपे प्रकाशान्तरानुदयात्फलव्याप्यत्वाभावेन न दृश्यत्वमनैकान्तिकमिति। तदेतदसिद्धिप्रसङ्गेन प्रागेव निरस्तमित्यलम्।

## मिथ्यात्वानुमाने अनध्यवसितत्वदोषप्रतिज्ञा

**जगतोऽभावेऽनुमानस्याप्यभाव इति तर्कबाधितत्वेनानध्यवसितः ।**

नन्वत्र जगतोऽनिर्वचनीयत्वं सद्विविक्तत्वं वा साध्यम्। तत्कथं जगतोऽभाव इत्यनुवादः? सत्यं, तथापि अनिर्वचनीयत्वस्या प्रसिद्धत्वात् सद्विविक्तस्य अनिर्वचनीयासदन्यतरत्वानिस्तारादसत्वमेव सिद्धवत्कृत्यायमनुवाद इत्यदोषः। जगतः सत्वभाव इति वा व्याख्यातव्यम्।

## जगतोऽभावेऽनुमानस्याप्यभावः इति तर्के व्याप्त्युपपादनम्

तथापि व्याप्त्यभावात्कथमिदमापादनम्? इति चेन्न। 'यदि जगन्मिथ्या स्यात् तदा तदन्तर्गतमनुमानमपि मिथ्या स्यात्। गन्धर्वनगरान्तर्भवनवत्' इति वा 'यदि दृश्यत्वं जगति वर्तमानं तन्मिथ्यात्वं प्रतिपादयेत्तदा अनुमानस्यापि मिथ्यात्वं प्रतिपादयेदविशेषात्' अन्यथा व्यबिचारापत्तेरिति वा आपादनात्।

## जगतोऽभावे इति मूलस्य असिद्ध्यादिपरत्वेन वैयर्थ्यशङ्का तत्परिहारश्च

नन्वनेन असिद्धिरेवोक्ता स्यात्। सा च प्रागेवोक्तेति किमनेन? न च वाच्यं लिङ्गाभावमात्रमसिद्धिः। साध्यलिङ्गव्याप्तीनामनुमानाङ्गानामभावोऽत्रापाद्यत इति भेद इति । तथात्वेऽपि व्याप्यत्वासिद्ध्याद्यनिस्तारादिति। मैवम्,

अनुमानाङ्गानामसत्त्वापादनमुखेन असाधकत्वस्यात्रापाद्यमानत्वात्। तदिदमुक्तम् 'इति तर्कबाधितत्वेनानध्यवसितः' इति। न विद्यते अद्यवसितम् अध्यवसायः साध्यसिद्धिर्यस्मात्स तथोक्त इति। एतेन अनुमानमिथ्यात्वं परस्येष्टमेव। तत्कथमापादनम्? इत्यपि निरस्तम्।

## मिथ्यात्वानुमाने अनध्यवसितत्वदोषोपपादनम्

नन्वेवं व्याख्याने हेतोः को दोष उक्तः स्यात्? अनध्यवसित इति ब्रूमः। तदर्थम् 'इत्यनध्यवसितः' इत्यस्य आवृत्तिर्व्याख्यायते। तर्हि 'तर्कबाधितत्वेन' इति कथम्? तथात्वे कालात्ययापदिष्टत्वप्रसङ्गादिति चेन्न। बाधितशब्दस्य विरुद्धार्थत्वात्।

## अनध्यवसितलक्षणस्य मिथ्यात्वानुमानगतत्वसमर्थनम्

ननु साध्यासाधकः पक्ष एव वर्तमानोऽनध्यवसितः। न चायं तथेति कथं अनध्यवसितः? इति चेन्न। तथा सति बाधिते सत्प्रतिपक्षे च केवलव्यतिरेकिण्यतिप्रसङ्गात्। साध्यासाधकत्वं नाम तत्प्रतीत्यजनकत्वम्। बाधितसत्प्रतिपक्षौ तु विपर्ययसन्देहजनकाविति चेत् तथा सति विरुद्धादिव्युदासस्य तत एव सिद्धेः 'पक्ष एव वर्तमानः' इत्यस्य वैयर्थ्यप्रसङ्गात्। असिद्धिपरिहारार्थं इति चेन्न। एवकारवैयर्थ्यात्। यथा चासिद्धातिरिक्तः साध्यासाधक इति लक्षणार्थः स्यात्। स च समः प्रकृतेऽपीति कथं नानध्यवसितः?

## असिद्धानध्यवसितयोर्लक्षणोदाहरणभेदसमर्थनम्

असिद्धिबहिर्भावोऽस्य कथम्? इति चेत्; इत्थं— यदा वादिप्रतिवादिनोरन्यतररीत्या लिङ्गाभावस्तदाऽसिद्धिः। यदा सामर्थ्यविघटनं तदा अनध्यवसित इति भेदः। प्रकृते तर्कस्यासिद्धिपुरस्कारेण प्रवृत्तेर्दोषद्वयमपि। न चैवं सर्वत्रेत्यसङ्कीर्णता च सिद्धेति।

## असत्वस्यैवासाधकत्वोपयोगितासमर्थनम्

ननु कथमसत्यस्यासाधकत्वम्? तथा सति धूमाभासास्यापि साधकत्वप्रसङ्गादिति ब्रूमः। अथ धूमाभासस्यासाधकता ना सत्त्वात्। अपि तु अव्याप्तत्वात्। बहुलोर्ध्वतादिवत् आभासविवेकस्यापि व्याप्त्युपयोगादिति मन्यते। तदा वक्तव्यं, किमेवं लोकानुभवात्कल्प्यते? उतासतोऽपि साधकत्वाभिमानात्? न प्रथमः - तदभावात्। लौकिका हि 'महाह्रदोऽग्निमान्धूमवत्त्वात्' इति प्रयुक्ते असिद्धिमुद्भावयन्ति। न द्वितीयः निर्मूलत्वात्। असत्यस्यापि प्रतिबिम्बादेः बिम्बादिसिद्धावङ्गतोपलम्भान्नेति चेन्न। प्रतिबिम्बाद्यसत्यताऽसिद्धेरन्यत्रोपपादितत्वात्।

## अर्थावच्छिन्नं ज्ञानमिति पक्षे अवच्छिन्नस्य हेतुत्वे अवच्छेदकस्यापि हेतुत्वमित्यादिव्याप्तिभङ्गः

सवितृसुषिरादिना अनिष्टानुमानं कथम्? इति चेन्न। तत्रापि तज्ज्ञानस्यैव साधकत्वात्। ज्ञेयभेदानवच्छिन्नस्य ज्ञानमात्रस्यातिप्रसङ्गित्वात्तदवच्छिन्नस्य सिध्याङ्गतायां तस्याप्यङ्गत्वमिति चेत्

न । दोषवशात्सत्यतद्विषयज्ञानसदृशस्य ज्ञानस्याङ्गताङ्गीकारात्। नन्वेवं सति प्रकृतेऽप्यनुमानाङ्गानां प्रतीतिसद्भावात्किं तत्सत्यतया? इति चेन्न। प्रतीतेरपि परेण सत्तानभ्युपगमात्।

किं च अस्त्ययं विभागः। किञ्चित्स्वरूपेण सत् ज्ञाततया अनुमानाङ्गम्। कस्यचत् ज्ञानमेवेति। अथ सतः साधकत्वं कुतः? इति चेत्। असतोऽसाधकत्वादर्शनादित्यास्तां विस्तरः।

## विश्वमिथ्यात्वानुमानस्य प्रबलप्रमाणबाधोपपादनम्

अनुमानस्यानवसरो द्वेधा प्रमाणबाधस्तत्प्रतिरोधश्च। तत्राद्यः प्रबल इति तमेवादौ दर्शयति।

**प्रत्यक्षादिविरुद्धत्वाद्विश्वं सत्यमित्यादिवाक्यविरुद्धत्वाच्चकालात्ययापदिष्टः ।**

यथायथं प्रत्यक्षानुमानागमसिद्धान् पदार्थान् खलु पक्षीकृत्य तन्मिथ्यात्वमनुमातव्यम्। प्रमाणानि च तत्सत्यतावगाहीनीति तद्बाधितत्वात्कालात्ययापदिष्टो भवति।

## प्रपञ्चे त्रैकालिकाबाध्यत्वस्य आगमसिद्धत्वोपपादनम्

ननु केयं सत्यता? या प्रत्यक्षादिगोचरा ब्रह्मणि परेणाङ्गीक्रियते सैवेति ब्रूमः। कालत्रयबाध्यतालक्षणा सा न प्रत्यक्षादि गोचर इति चेत्। तर्हि ब्रह्मणोऽपि कुतः सिद्धा? 'तत्सत्यम्' इत्याद्यागमादिति चेत्, तर्हि तत्प्रकृतेऽपि सममिति तद्विरोधात्कालातीत एव। तदिदमुक्तं 'विश्वं सत्यम्' इत्यादिना। अन्यथा प्रत्यक्षादीत्यादिपदेन वाक्यस्यापि गृहीतत्वात्पुनर्ग्रहणं व्यर्थं स्यात्।

## प्रपञ्चे त्रैकालिकाबाध्यत्वस्य प्रत्यक्षाधिसिद्धत्वोपपादनम्

अङ्गीकारवादश्चायम्। यथा च त्रैकालिकाबाध्यत्वलक्षणं सत्यत्वं प्रत्यक्षादिनैव सिद्धं तथोपपादितमन्यत्रेति।

## विश्वमिथ्यात्वानुमाने प्रकरणसमदोषः

प्रतिरोधोऽपि द्विविधः तेनैव हेतुना हेत्वन्तरेणेति। तत्राद्यस्यान्तरङ्गत्वात्प्रथमं तमाह—

**रजतं दृष्टमितिभ्रममात्रत्वात्, विमतं सत्यं**

**दृश्यत्वात्, आत्मवदित्यपि प्रयोज्यत्वात् प्रकरणसमः ।**

'विमतम्' इति पूर्ववद्व्याख्येयम्। सत्यं कालत्रयाबाध्यम्। आत्मनोऽपि दृश्यत्वस्योपपादितत्वान्न दृष्टान्तः साधनविकलः 'इत्यपि प्रयोज्यत्वात्' प्रपञ्चमिथ्यात्व इव तत्सत्यत्वेऽपि दृश्यत्वस्य प्रयोक्तुं शक्यत्वात्।

### शुक्तिरजते दृग्विषयत्वरूपदृश्यत्वाभावसमर्थनम्

ननु मिथ्याभूतेऽपि शुक्तिरजते वर्तमानं दृश्यत्वं कथं प्रपञ्चसत्यतासिद्धौ प्रयोक्तुं शक्यते? इति। अत उक्तं 'रजतमित्यादि'। इदमत्राकूतम्। दृग्विषयत्वं हि दृश्यत्वमत्राभिमतम्। 'यत्सन्निकृष्टकरणेन यज्ज्ञानमुत्पद्यते स तस्य विषयः' इति अनित्यज्ञाने व्यवस्था। रजतज्ञानं च शुक्तिसन्निकृष्टेन्द्रियेण जातमिति सैव तस्य विषयः।

### दृग्व्यावर्तकत्वरूपदृगुल्लेख्यत्वमेव शुक्तिरजतस्येति समर्थनम्

अत एव 'अन्यत् अन्यात्मना अवगाहते' इति भ्रमः। तथा च 'रजतं दृष्टम्' इति योऽयमनुव्यवसायः स च भ्रम एव। न च भ्रान्तिकल्पितेन विपक्षवृत्तित्वेन लिङ्गस्य व्यभिचारो भवति। तथा सति सर्वानुमानोच्छेदप्रसङ्गात्।

### शुक्तिरजते दृग्विषयत्वरूपदृश्यत्वाभावे विरोधाद्युद्भावनानुपपत्तिशङ्का तन्निरासश्च

दृग्विषयत्वाभावेऽपि दृग्व्यावर्तकत्वमात्रमसतोऽपिशुक्ति रजतस्यास्तीति तदभ्युपगमेन न विरुद्धादिवादविरोध इति। नन्वनैकान्त्यं दृष्टान्तस्य साधनवैकल्यं चानाश्रित्य न प्रकरणसमप्रवृत्तिरिति ताभ्यामेवालम्, किमनेन? मैवं तथा सति हेतुदोषमनाश्रित्य दृष्टान्तदोषाप्रवृत्तेः सोऽप्यनुपसङ्ख्येयः स्यात्। स्फुटप्रतिभासवशात्तत्परिग्रहे प्रकृतेऽपि समानम्। वस्तुतस्तु नेयमाचार्यप्रक्रिया। विरुद्धानैकान्तिकादिवत् परपरिकल्पितरीत्या व्यवहार इति।

### विश्वमिथ्यात्वानुमाने सप्रतिसाधनदोषः

**विमतं सत्यं प्रमाणदृष्टत्वाद्यदित्थं तत् तथा यथात्मेति**

**प्रयोगात् सप्रतिसाधनः ।**

नन्वत्र दृष्टत्वमात्रस्य व्यभिचारोऽस्ति न वा? आद्ये पूर्वानुमान मसत्स्यात्। तत्र तन्मात्रस्य प्रयोगात्। द्वितीये प्रमाणविशेषणवैयर्थ्यमिति। मैवं, प्रमाणदृष्टत्वापदेन प्रामाणिकत्वमात्रस्याभिमतत्वात्। अथवा दृग्व्यावर्तकत्वमेवात्र दृष्टत्वमभिमतम्। तच्च शुक्तिरजतादावस्तीति सफलं विशेषणम्।

### अनुमानप्रयोगे व्याप्त्यभिधाननियमाभावसूचनम्

पूर्वानुमाने व्याप्तिमनभिधायात्र यदित्थं तत्तथेति तामभिदधता तदभिधाननियमो नास्तीति सूचितम्। आत्मनः प्रमाणदृष्टत्वानङ्गीकारे वेदान्तवैयर्थ्यं स्यात्।

**प्रमाणदृष्टत्वहेतुं विकल्प्य दूषणं तन्निरासश्च**

नन्वत्र तत्त्वावेदकप्रमाणदृष्टत्वं हेतुः? उत अतत्त्वावेदक प्रामाणदृष्टत्वम्? आद्येऽसिद्धिः। द्वितीय विरोध इति। मैवम्, 'अतत्त्वावेदकं प्रमाणम्' इति च विप्रतिषिद्धमेतत्।

**प्रमाणदृष्टत्वानुमाने असिद्धिशङ्का तन्निरासश्च**

एवं तर्हि असिद्धिरेवास्त्विति चेत् न । 'प्रपञ्चमिथ्यात्वसिद्धौ प्रत्यक्षादीनामप्रामाण्यसिद्धिः तत्सिद्धौ च तत्सिद्धिः' तिइ परस्पराश्रयप्रसङ्गात्।

**प्रमाणदृष्टत्वानुमाने शङ्कितस्यात्मत्वोपधेर्विकल्पेन निरासः**

आत्मत्वमत्रोपाधिरिति चेन्न। तस्यैवानिरूपणात्। न तावज्ज्ञानत्वमात्मत्वम्। ज्ञातृज्ञेयशून्यस्य ज्ञानस्यापि शून्यत्वात्। नापि ज्ञानाश्रयत्वम् निर्गुणत्वाङ्गीकारात्। न च सामान्यविशेष आत्मत्वम्। सामान्यस्यापि वास्तवस्य परेणानङ्गीकारात्। कल्पितस्य तु देहादावपि सद्भावात्।

**प्रपञ्चस्य सत्यत्वे दृग्दृश्ययोः सम्बन्धाभावेन दृश्यत्वानुपपत्तिशङ्का निरासः**

प्रपञ्चस्य सत्यत्वे दृग्दृश्ययोः सम्बन्धानुपपत्तेः कथं दृश्यत्वम्? इति चेत्।

अन्तरेणैव सम्बन्धं दृश्यत्वमस्तु। अतिप्रसङ्गं च प्रतीतिरेवापाकरिष्यति।

**अध्यासिकसम्बन्धं विनापि दृग्दृश्ययोः संयोगसम्बन्धमङ्गीकृत्य दृश्यत्वोपपादनम्**

संयोगो वाऽस्तु। गुणत्वान्नेति चेत्। त्यज्यतां गुणत्वम्। गुणत्वे वा गुणादिपञ्चकस्य निर्गुणत्वनिष्क्रियत्वपरिभाषा नादरणीया।

**आध्यासिकसम्बन्धं विनापि दृग्दृश्ययोः समवायसम्बन्धमाश्रित्य दृश्यत्वोपपादनम्**

समवायो वा अस्तु। प्रक्रिया तु प्रकारान्तरेण कल्प्यताम्।

**दृग्दृश्ययोः संयोगसमवायातिरिक्तवास्तवसम्बन्धमाश्रित्य दृश्यत्वोपपादनम्**

किञ्च गुणगुणिनोः संयोगानुपपत्तौ समवाय इव तन्तुद्वयस्य समवायासम्भवे संयोग इव च दृग्दृश्ययोः प्रसिद्धसम्बन्धानुपपत्तावन्य एव कश्चिद्वास्तवः किं न कल्पनीयः? न हि प्रक्रियापरिक्षयो वस्तुपरिक्षयाद्गरीयान्।

**प्रपञ्चस्य मिथ्यात्वेऽपि दृश्यत्वानुपपत्तिसमर्थनम्**

किञ्च मिथ्यात्वेऽपि कथं दृश्यत्वम्? गगन इव गन्धर्वनगरस्य दृशि प्रपञ्चस्यारोपितत्वादिति चेत् तर्हि सर्वेण सर्वं दृश्येत। न वा केनापि किञ्चित्। इन्द्रियसन्निकर्षादिकं नियामकमिति चेत् तर्हि

किमनेनारोपितत्वेन? करणसम्बन्धादिनिबन्धनो विषयविषयिभाव एवास्तु दृग्दृश्ययोः सम्बन्ध इति सङ्क्षेपः।

## प्रपञ्चमिथ्यात्वानुमाने दृष्टान्ते साध्यवैकल्योपपादनम्

अथावसरतो दृष्टान्तं दूषयिष्यन् साध्यसिद्ध्यर्थं साधनान्वेषणमिति प्राधान्यात् साध्यवैकल्यं तावदाह—

**शुक्तिरजतस्याप्यनिर्वचनीयत्वाभावात् साध्यविकलो दृष्टान्तः ।**

'किमु तद्दृष्टान्तेन जगतः' इति अपिशब्दार्थः। असत्त्वस्य परेण जगत्यसिसाधयिषितत्वात्सद्विविक्तत्वादीनां च अनिर्वचनीयत्वा बहिर्भावं सिद्धवत्कृत्य 'अनिर्वचनीयत्वाभावात्' इत्युक्तम्। 'साध्य विकलः' इति साध्यसमानधर्मविकल उच्यते।

## शुक्तिरजतानिर्वचनीयत्वसाधकार्थापत्तिशङ्का

न तावच्छुक्तिरजतं सत्। बादविरोधात्। नाप्यसत्। अपरोक्षतया प्रतीत्यनुपपत्तेः। ततोऽर्थादनिर्वचनीयं तदिति चेन्न।

## अर्थापत्तेः सदसदतात्मकत्वेनाप्युपपत्तिसमर्थनम्

सत्त्वात्प्रतीतिः, असत्वाच्च बाधः, इति सदसदात्मकत्वेनाप्युपपत्तेः। तत् विरुद्धमिति चेत्। कोऽयं विरोधः अर्थापत्तिश्चेत्तथाभावं गमयेत्। अन्यथा सदसद्वैलक्षण्यमपि नाङ्गीकार्यं स्यात्। विरुद्धविधिसमुच्चयवत् विरुद्धनिषेधसमुच्चयस्यापि विरुद्धत्वात्। निषेधसमुच्चयस्यातात्विकत्त्वान्न विरोध इति चेत्। तर्हि विधिसमुच्चयोऽप्यतात्विक एवाङ्गीक्रियताम्। लाघवात्।

## आध्यासिकसम्बन्धं विना दृश्यत्वानुपपत्तेरेवाभावसमर्थनम्

किञ्च अपरोक्षप्रतीतिविषयत्वमुक्तविधया न शुक्तिरजतस्यास्तीति कस्यानुपपत्तिः? उल्लेखमात्रं त्वसतोऽपि चेत्का अनुपपत्तिः? विस्तृतमेतदन्यत्रेत्यलं पल्लवितेन।

## प्रपञ्चमिथ्यात्वानुमाने दृष्टान्ते साधनवैकल्योपपादनम्

**उक्तप्रकारेण दृश्यत्वाभावात् साधनविकलश्च ।**

'रजतं' दृष्टमिति भ्रममात्रत्वात्' इति उक्तप्रकारेण। 'शुक्तिरजतस्य' इत्यनुवर्तते। 'च'कारो दृष्टान्त इत्यस्यानुकर्षणार्थः।

## प्रपञ्चमिथ्यात्वानुमाने उपाधिदोषोद्भावनम्

केचित्, उपाधिदोषमसिद्धावन्तर्भावयन्ति। अन्ये, अनैकान्तिके। परे, कालात्ययापदिष्टतायाम्। एके सत्प्रतिपक्षतायाम्। केचित्तु दृष्टान्तदोष इति। तत्र गुणदोषचिन्तायां नायमवसर इति सर्वावसितौ उपाधिदोषमाह—

प्रमाणविरुद्धत्वमुपाधिः ।

## उपाधेः साध्याभिन्नताशङ्का

नन्वत्र बाध्यत्वं साध्यम्। तदेव च प्रमाणविरुद्धत्वम्। न हि स्वस्मिन्स्वयमुपाधिः। व्याप्यव्यापकभावस्य भिन्नाश्रयत्वादिति। मैवम्। अन्यथाप्रतिपत्तिपूर्वकं तदुन्मूलनेन सम्यग्बोधो बाधः। प्रमाणविरोधस्तु विपरीतप्रमाणविषयत्वमात्रमिति भेदात्।

## प्रमाणविरुद्धत्वोपाधेः साधनव्यापकत्वशङ्का तत्परिहारश्च

तर्हि अनुपसञ्जातबाधभ्रमे प्रमाणविरुद्धत्वं नास्तीत्यव्याप्तिरिति चेन्न। तत्रापि बाधार्हत्वस्य सत्त्वात्।

## प्रमाणविरुद्धत्वोपाधेः साधनव्यापकत्वशङ्का तन्निरासश्च

प्रपञ्चस्यापि प्रमाणविरुधत्वात्साधनव्यापकोऽयमिति चेन्न। प्रतीतप्रमाणानामन्यथा व्याख्यातत्वात्। दृश्यत्वेन साधने मिथ्यात्वस्योपाधित्वात्। अन्योन्योपाधिभावेनापि अनुमानस्याभासत्वात्।

## प्रमाणविरुद्धत्वस्यैव मिथ्यात्वे प्रयोजकत्व समर्थनम्

लोके च कस्यचिदर्थस्य सत्यत्वमिथ्यात्वयोर्विप्रतिपत्तौ दर्शनं सत्यतायां प्रमाणविरोधं मिथ्यात्वेऽनुसरन्ति। ततो मिथ्यात्वे तदेव प्रयोजकमिति ज्ञायते।

## पक्षादिलक्षणकथने कारणोक्तिपूर्वं पक्षलक्षणकथनम्

अत्र 'आश्रयासिद्धः पक्षः', सपक्षाबावाद्विरुद्धः', 'असिद्धो हेतुः', 'साध्यविकलो दृष्टान्तः' इति पक्षसपक्षविपक्षाः प्रतिज्ञाहेतुदृष्टान्ताश्च व्यवहृताः। न च पक्षादिस्वरूपानवगतौ उक्तदोष स्फूर्तिर्भवतीति क्रमेण तल्लक्षणान्याह—

साध्यधर्मविशिष्टः पक्षः ॥

'यत्प्रतीतिर्लिङ्गेन जनयितव्या स साध्यधर्मः' इति नास्ति कश्चित् क्षुद्रोपद्रवः। साध्यग्रहणं सपक्षादिव्यावृत्त्यर्थम्। 'साध्यविशिष्टः' इत्येवोक्ते वस्तुतोऽग्निविशिष्टस्य पर्वतस्य साध्यत्वात् तद्विशिष्टस्यान्यस्य पक्षत्वं स्यात्तदर्थं धर्मग्रहणम्। धर्ममात्रस्य प्रागेव सिद्धत्वात्

साध्यत्वानुपपत्तेर्विशिष्टग्रहणम्। तथा च साध्यत्वं धर्मस्य तत्सम्बन्धितयैव सिध्यति। विशिष्टत्वं च धर्मधर्मिभावेनैव विवक्षितम्। न तु सम्बन्दमात्रेण। तेन साधनधर्मादावतिप्रसङ्गाभावान्न तदर्थं धर्मोति वक्तव्यम्।

## सपक्षलक्षणम्

साध्यसमानधर्मविशिष्टः सपक्षः ॥

पक्षविपक्षयोरपि समानधर्मविशिष्टत्वात्तद्व्युदासार्थं साध्यग्रहणम्। समानग्रहणं च पक्षव्युदासार्थम्। समानत्वं च साध्यत्वमपहाय साक्षादेवेति नातिप्रसङ्गः। शेषं पूर्ववत्।

## विपक्षलक्षणम्

साध्यविपरीतधर्मविशिष्टो विपक्षः ॥

विपरीतो विरुद्धः। यथा अग्निमत्वसाधने निरग्निकत्वम्। तेन पक्षसपक्षयोरपि व्युदासः।

## प्रतिज्ञालक्षणम्

पक्षवचनं प्रतिज्ञा ॥

नन्वेवं सति 'पक्षः' इत्यादेः प्रतिज्ञात्वं स्यात्। न स्यात्। येनाकारेण योऽर्थः परं प्रति जिज्ञापयिषितः तथा तन्निर्देशस्य विवक्षितत्वात्। अत एव न निगमने प्रसङ्गः।

## हेतुलक्षणम्

लिङ्गं हेतुः ॥

व्याप्तिबलने अर्थगमकं लिङ्गम्। यद्यपि हेतुशब्दः साधनत्वाभिव्यञ्जकलिङ्गवचने प्रसिद्धः तथाप्यर्थस्यैवात्र विवक्षितत्वात्तल्लक्षणमेवोक्तमिति अर्थे वर्तते।

## दृष्टान्तलक्षणम्

निदर्शनं दृष्टान्तः ॥

निदश्यते साध्यसाधनयोर्धर्मयोर्व्याप्तिर्यस्मिन् तन्निदर्शनम्। व्याप्तिग्रहणस्थलमिति यावत्। तद्वचनमुदाहरणं प्रसिद्धमेवेति।

## ग्रन्थन्ते मङ्गलाचरणम्

यत्प्रसादात् यत्प्रीत्यैव च इदं प्रकरणं कृतवांस्तमेवाचार्योऽन्ते स्तुतिप्रणामाभ्यां प्रीणयति—

यो दृश्यते सदानन्दनित्यव्यक्तचिदात्मना ।

निर्दोषाखिलकल्याणगुणं वन्दे रमापतिम् ॥

## ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं प्रपञ्चमिथ्यात्वानुमानखण्डनम् सम्पूर्णम्॥

दृश्यते इत्यनेन 'दृश्यते त्वग्र्यया बुद्ध्या' इत्यादिश्रुतिं सूचयति। तेन यदुक्तम् 'आत्मनोऽपि दृश्यत्वात्' इति तदुपपादितं भवति। दृश्यते चेद्रूपादिमत्त्वेनानित्यत्वं प्रसज्येतेति चेन्न। निर्दोषानन्दनित्याभिव्यक्त—ज्ञानात्मकत्वेन अजडत्वात्। तदाह— सदानन्देति॥ इत्थम्भूतलक्षणे तृतीया। न केवलं निर्दोषानन्दचिदात्मकः। नाप्यभेदात् गुणगुणिभावाभाव इत्युक्तं निर्दोषेति॥ कल्याणत्वं परिपूर्णत्वादिना। रमापतिमित्यनेन भगवती चापि वन्दिता भवतीति।

उत्पत्तिस्थितिभङ्गं विश्वं यस्मात्प्रपद्यते पुरुषात्। स जयति जगतामन्तर्यामी स्वामी रमानाथः॥

## इति श्रीमदानन्दतीर्थभगवत्पादाचार्येणविरचित प्रपञ्चमिथ्यात्वानुमानखण्डनविवरणं जयतीर्थभिक्षुविरचितं सम्पूर्णम्॥

॥ श्री कृष्णार्पणमस्तु ॥

॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥

॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥